# SANSKRIT

**(Second Language)**

***Maximum Marks : 80***

***Time Allowed : Three Hours***

***Answers to this Paper must be written on the paper provided separately.***

*You will **not** be allowed to write during the first **15** minutes.*

*This time is to be spent in reading the question paper.*

***The time given at the head of this Paper is the time allowed for writing the answers.***

*This paper comparises of **two** Sections : **Section A** and **Section B**.*

*Attempt **all** the questions from **Section A**.*

*Attempt **four** questions from **Section B**, answering at least **one** question each from the **two** books you have studied and **any two** other questions from the same books you have compulsorily chosen.*

*The intended marks for questions or parts of questions are given in brackets [ ].*

## SECTION—A (40 Marks)

*Attempt **all** questions from this section.*

**Question 1**

Write a short composition in **Sanskrit** of **150-200** words on any **one** of the following topics :— [15]

अधोलिखितेषु विषयेषु एकं विषयम् आधृत्य **150–200** शब्दपरिमितं लघुनिबन्धं **संस्कृतभाषया** लिखत :—

(i) विश्वे विविधा: घटना: सम्भवन्ति। समूहमध्यमा: तेषां विषये ज्ञानं यच्छन्ति। अत: समूहमाध्यमस्य परिचयात्मकं लघुनिबन्धं लिखत।

(ii) प्रत्येकस्य जीवने सज्जनसहवास: महोन्नतिदायक: इति कथयित्वा सज्जनसहवासमहत्त्वविषये लिखत।

(iii) विज्ञानस्य प्रगतित: अस्माकं जीवनं सुविधं जातम्। एतद्विषये निबन्धं लिखत।

(iv) "स्वस्थे शरीरे स्वस्थं मन:" इति वचनमनुगुणं दैहिकमानसिकारोग्यरक्षणस्य उपायविषये लिखत।

**This Paper consists of 8 printed pages.**



Downloaded From www.icseboard.org

(v) (Picture composition) प्रस्तुतं चित्रम् आधृत्य **संस्कृतभाषया** लघु निबन्धमेकं लिखत :–



**Question 2**

Write a letter in **Sanskrit** in approximately **120** words on any **one** of the following topic :— [7]

अधोलिखितयोः विषययोः **एकं** विषयम् आधृत्य **संस्कृतभाषया** पत्रं लिखत :—

(i) भवत्प्रदेशस्य स्वच्छतां रक्षितुं प्रार्थयित्वा नगरपालिकायाः अध्यक्षमहोदयं प्रति पत्रं लिखत।

(ii) विद्यालये आचरितस्य क्रीडादिनस्य वर्णनं कृत्वा मित्रं प्रति पत्रं लिखत।

**Question 3**

Read the passage given below and answer in **Sanskrit** the questions that follow, using your own words as far as possible :—

अधोलिखितम् अनुच्छेदं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि यथासंभवं स्वशब्देषु **संस्कृतभाषया** लिखत :—

कश्चित् राजा। तस्य ऐश्वर्यम् अपारम्। अनेकविधानि रत्नानि, मौक्तिकानि, वज्रवैडूर्यादीनि च तेन सङ्गृहीतानि आसन्। एतादृशी अपारा सम्पत्तिः जगति अन्यस्य कस्यापि सविधे नास्ति इति चिन्तनम् आसीत् तस्य। अतः अतिथिभ्यः तां सम्पत्तिं साभिमानं दर्शयति स्म सः। अपारमूल्यवती सा सम्पत्तिः भूमेः अन्तः निर्मिते

Downloaded From www.icseboard.org

विशिष्टे रक्षगृहे स्थाप्यते स्म। तस्य गृहस्य रक्षणाय एकं सैन्यदलमेव नियुक्तम् आसीत् राजा। कदाचित् कश्चन संन्यासी राजप्रासादम् आगतवान्। राजा तं यथोचितं सत्कृत्य प्रसङ्गवशात् स्वस्य सम्पत्तेः विषयमपि अवदत्। तदा संन्यासी अवदत् - "अमूल्या सम्पत्तिः अस्ति किं तव ? ताम् अहं द्रष्टुम् इच्छामि" इति।

राजा संन्यासिनं सम्पत्तिगृहं प्रति अनयत्। सम्पत्तेः प्रदर्शनाय सः एकं दीपं गृहीतवान् आसीत्। दीपप्रकाशे रत्नमौक्तिकादीनि विशेषतः प्रकाशन्ते स्म। राजा सर्वाणि अपि एकैकशः अदर्शयत्। संन्यासी कुतूहलेन सर्वम् अपश्यत्। राजा तु एकैकमपि कदा कुत्रः प्राप्तम् इति, तस्य वैशिष्ट्यं किम् इति च विस्तरेण वर्णयन् आसीत्। तावता संन्यासी हठात् राजाः हस्ते स्थितं दीपं फूत्कृत्य निर्वापितवान्। तस्मात् तत्र सर्वत्र अन्धकारः प्रसृतः। संन्यासी राजानम् अपृच्छत् - "इदानीं किमर्थं भवतः रत्नमौक्तिकादीनि न प्रकाशन्ते ? इति।

"दीपः निर्विण्णः। अतः तानि न दृश्यन्ते। मम भटाः इदानीम् अन्यं दीपम् आनयन्ति। तदा एतानि प्रकाशयिष्यन्ते" इति अवदत् राजा। "राजन् ! दीपप्रकाशस्य अभावे तु रत्नमौक्तिकादीनां महामूल्यता अपि अकिञ्चित्करी। यथा दीपः सर्वप्रकाशकः तथा भवति आत्मविकासः गुणोत्कर्षः च। तस्य सम्पादनाय वर्धनाय च प्रयासः करणीयः। गुणोत्कर्षस्य अभावे न कापि सम्पत्तिः उपकाराय भवति। सम्पत्तिः अस्थिरा। अद्य या अस्ति सा अग्रे कदाचित् विनष्टा भवेत्। किन्तु गुणोत्कर्षः तु शाश्वतः। सर्वोपकारकं तम् अर्जयितुं विकासयितुं च विशेषप्रयासः भवतु" इति अवदत् संन्यासी।

(i) कदाचित् राजप्रासादं कः आगतवान् ? सः नृपं प्रति किम् अवदत् ? [2]

(ii) नृपेण कानि सङ्गृहीतानि ? तस्य चिन्तनं किम् इति आसीत् ? [2]

(iii) गुणोत्कर्षस्य आभावेन कः परिणामः भवति इति संन्यासी नृपं प्रति अवदत् ? [2]

(iv) संन्यासी दीपं निर्वाप्य नृपं प्रति किम् अपृच्छत् ? तदा राजा किमवदत् ? [2]

(v) नृपः सम्पत्तिं कुत्र स्थापितवान् ? तस्य रक्षणं कथम् अकरोत् ? [2]

**Question 4**

Answer the following questions according to the instructions given :— [8]

अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरयत :—

(i) अत्र एतत् शुद्धं वाक्यम् भवति।

(a) विद्यालयस्य बहिः छात्राः क्रीडन्ति

(b) विद्यालयं बहिः छात्राः क्रीडन्ति

(c) विद्यालयात् बहिः छात्राः क्रीडन्ति

(d) विद्यालये बहिः छात्राः क्रीडन्ति।

Downloaded From www.icseboard.org

(ii) "मातापितरौ" इत्यस्य विग्रहवाक्यम् एवं भवति।

(a) माता च पिता च

(b) माता च पितरौ च

(c) मात: च पित: च

(d) मातु: पिता

(iii) "निषादर्षभ" अत्र सन्धे: विभाग: एवं भवति।

(a) निषात् + अर्षभ

(b) निषाद + अर्षभ

(c) निषादर् + षभ

(d) निषद + ऋषभ

(iv) "त्वया अत्र उष्यते" अस्य वाच्यपरिवर्तनमेवं भवति।

(a) त्वम् अत्र वसति

(b) त्वम् अत्र वससि

(c) त्वम् अत्र उष्यसि

(d) त्वया अत्र वसति

(v) "ट ठ ड ढ" एतादृशा: वर्णा: भवन्ति।

(a) कण्ठ्यवर्णा:

(b) तालव्यवर्णा:

(c) मूर्धन्यवर्णा:

(d) दन्त्यवर्णा:

(vi) "सात्विक: सान्वीं प्रश्नं पृच्छति" अस्य लृटलकारेण परिवर्तनम् एवं भवति।

(a) सात्विक: सान्वीं प्रश्नम् अपृच्छत्

(b) सात्विक: सान्वीं प्रश्नं प्रक्ष्यति

(c) सात्विक: सान्वीं प्रश्नं पृच्छिष्यति

(d) सात्विक: सान्वीं प्रक्षिष्यति

Downloaded From www.icseboard.org

(vii) "प्रभवितुम्" इत्यस्य प्रकृतिप्रत्ययविभजनम् एवं भवति।

(a) प्र + भू + तुमुन्

(b) प्रभव + तुमुन्

(c) प्र + भव + तुमुन्

(d) प्र + भवि + तुमुन्

(viii) "तदीयम्" इति पदस्य विभजनम् एवं भवति।

(a) ता: इदम्

(b) तस्मै इदम्

(c) तेन इदम्

(d) तस्य इदम्

**SECTION—B (40 Marks)**

*Questions from only **two** of the following textbooks are to be answered.*

*Attempt **four** questions from this section.*

*You must answer at least **one** question from the **two** books*

*you have studied and **any two** other questions.*

## संस्कृतवाणी भाग—4

## वसुधैव कुटुम्बकम्

**Question 5**

Read the following extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** लिखत :—

सज्जनानां जीवनं परहिताय भवति। विशालहृदया: एते महापुरुषा: सकलविश्वं स्वकुटुम्बं मन्यमाना: नीतिमार्गं कदापि न त्यजन्ति। ते आर्तजनानां सेवायां सदा निरता: भवन्ति। अपकारे कृते अपि साधुव्यवहारम् आचरन्ति।

(i) सज्जनानां जीवनं किमर्थं भवति ? ते कथं व्यवहारमाचरन्ति ? [2]

(ii) सर्वेषु धार्मिकग्रन्थेषु किं कथितम् ? उदारचरितानां गणना कथं भवति ? [2]

(iii) मानव: कथं गौरवं सुखं प्राप्नोति ? कदा अस्माकं जीवनं सार्थकं भवति ? [3]

(iv) प्रकृते: पञ्चभूतानि किमर्थं सन्ति ? तस्या: उदारता कथं श्लोके वर्णिता ? [3]



Downloaded From www.icseboard.org

## अमृतधारा

**Question 6**

Read the following extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** लिखत :—

संस्कृतसाहित्ये सुभाषितानां वैशिष्ट्यपूर्णं स्थानं विद्यते। रामायण-महाभारत-पुराण-काव्यादिषु अन्येषु ग्रन्थेषु च यत्र तत्र सुभाषितानि कविभिः विनिवेशितानि। ईदृश सुभाषितानां पृथक् सङ्ग्रहः अपि तैः कृतः विद्वद्भिः। सुभाषितानां सङ्ग्रहः कण्ठपाठश्च अवश्यं कर्तव्यः। अनेन बहूनि प्रयोजनानि सिद्धानि भवन्ति इति अनुभवगम्यः अयं विचारः।

(i) कस्य सुहृत् दर्शनम् औषधम् ? [2]

(ii) कः शीलगुणान् न त्यजति ? उदाहरणसहितं विवृणुत। [2]

(iii) सत्सङ्गतिः पुंसां किं करोति ? [3]

(iv) नरस्य श्रेष्ठं भूषणं किम् ? कानि पुरुषं न भूषयन्ति ? [3]

## महाकविः कालिदासः

**Question 7**

Read the following extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** लिखत :—

"संस्कृतकविषु अग्रगण्यः" कालिदासः 'कविकुलगुरुः, कविताकामिन्याः विलास' इति प्रसिद्धः आसीत्। आङ्लसाहित्ये शेक्सपियर् प्रसिद्धः तथा कालिदासः भारतीयसाहित्यक्षेत्रे अनुपम – कविः, सर्वश्रेष्ठ – कविः इति गौरवं प्राप्तवान्।

(i) कालिदासस्य कृतयः काः ? [2]

(ii) अनामिका किमर्थं सार्थवती बभूव ? [2]

(iii) कालिदासस्य लोकप्रियतायाः कारणं किम् ? [3]

(iv) विक्रमादित्यस्य आस्थानस्य नव मौक्तिकानां नामानि लिखत। [3]



Downloaded From www.icseboard.org

## संस्कृतवाणी भाग—5

## चतुरः रामकृष्णः

**Question 8**

Read the following extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** लिखत :—

रामकृष्णः व्याधिग्रस्तानां जनानां चिकित्सां करोति स्म। एतदर्थम् औषधस्य अन्वेषणार्थं सः वनं गच्छति स्म। एकदा सः औषधीय-वस्तूनि आनेतुं वनं गतः। तस्मिन् वने नरभक्षकाः अपि अवसन्। ते वनागतान् जनान् गृहीत्वा खादन्ति स्म।अतः जनाः तद्वनप्रवेशस्य विचारात् एव भीताः भवन्ति स्म।

(i) कृष्णदेवरायः कः ? तस्य सभा कीदृशी आसीत् ? [2]

(ii) कः विकटकविः इति प्रसिद्धः ? कथं सः पारितोषिकान् लभते स्म ? [2]

(iii) नायकः किमर्थं रामकृष्णाय गृहं गन्तुम् अनुमतिं दत्तवान् ? [3]

(iv) भयहेतुकः नायकः उच्चस्वरेण रामकृष्णं किं प्रत्यवदत् ? [3]

## परोपकारार्थमिदं शरीरम्

**Question 9**

Read the following extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** लिखत :—

यामानन्तरं लुब्धकः जागृतः। वृकः सुप्तः। अस्य अवसरस्य सदुपयोगं कर्तुम् इच्छन् शार्दूलः एवम् उक्तवान् - 'हे मूर्ख ! मत्तः भीतः भवान् तत्र स्थितः। वृकः तव जीवरक्षकः इति भवतः विश्वासः अस्ति। परन्तु सत्यं तु अन्यत् अस्ति। मम हस्तात् विमोच्य स एव त्वां भक्षयितुं वाञ्छति। सः तव भक्षकः न रक्षकः' इति।

(i) व्याधः धनार्जनार्थं किं करोति स्म ? सः किमर्थं बहुखिन्नः अभवत् ? [2]

(ii) परोपकारो नाम कः ? परोपकारिणः अन्येषां कृते किं कुर्वन्ति ? [2]

(iii) परिश्रान्तं लुब्धकं दृष्ट्वा वृकः किम् अवदत् ? [3]

(iv) वृकः सावधानचित्तेन किम् अवदत् ? [3]

Downloaded From www.icseboard.org

## प्रार्थना

**Question 10**

Read the following extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** लिखत :—

अञ्जनानन्दनं वीरं जानकी शोकनाशनम् ।

कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ?।।

अनन्तनामधेयाय सर्वाकारविधायिने ।

समस्तमन्त्रवाच्याय, विश्वैकपतये नमः ।।

(i) वक्रतुण्डः कीदृशः अस्ति ? सः किं करोति ? [2]

(ii) मानवः कथं सुखी भवति ? [2]

(iii) कः सर्वभूतेषु निगूढः अस्ति ? सः कीदृशः भवति ? [3]

(iv) इदं जगत् केन व्याप्तम् ? कथं भुञ्जीथाः च ? [3]

Downloaded From www.icseboard.org